National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(62): 173-178
© 2025 NJHSR
www.sanskritarticle.com

**फूलचन्दः**
शोधछात्रः, साहित्य विभागः,
राष्ट्रिय संस्कृतविश्विद्यालयः,
तिरुपतिः

**Correspondence:**
**फूलचन्दः**
शोधछात्रः, साहित्य विभागः,
राष्ट्रिय संस्कृतविश्विद्यालयः,
तिरुपतिः

# रत्नपालचरितेअलङ्काराणां प्रयोगः

**फूलचन्दः**

**सारांशः -**

कविहृदयात् निर्मितस्य काव्यबालायाः सौन्दर्यं अनुप्रासोपमादिसदृशानां अलङ्कारानाम् सहयोगेन अधिकं उत्कृष्टं भवति। एते वाक्-संरचनायाः सौन्दर्यस्य च सम्वर्धकाः मन्यन्ते। अत एव भारतीयाचार्याः 'सौन्दर्यमलङ्कारः' इति कथयन्ति।प्रस्तुतकाव्यस्य अलङ्कारप्रयोगस्य उपयुज्यता विचार्यते । काव्ये तेषां प्रयोगः सुलभसञ्चाराय भावव्यञ्जनाय च भवति। विवेकशीलस्य महाकविमहाप्रज्ञस्य रचनायां 'अहमहमिके'ति भावेन अलङ्काराः आगच्छन्ति। 'रत्नपालचरितं' इति काव्यं एतत् कवेः अलङ्कारानां सुन्दरवर्णनेन रसचर्वणीयताद्वारा च उत्कर्षं प्रति गच्छति। आचार्यमहाप्रज्ञस्य 'रत्नपालचरित' इति ग्रन्थे प्रायः विंशतिः अलङ्काराः प्रयुक्ताः सन्ति। साहित्यज्ञैः निर्धारितस्य अलङ्कारस्य स्वरूपसम्बद्धसंज्ञां स्वीकृत्य तस्मिन् वर्तमानानाम् केषाञ्चन अलङ्काराणां व्याख्या अत्र प्रस्तुता-

**प्रस्तावना -**

अलंकारः द्वयोः शब्दयोः संयोगेन निर्मितः अस्ति – अलम् तथा कारः। यस्य अर्थः – शोभाकारकः पदार्थः। 'अलङ्करोति इति अलङ्कारः' सौन्दर्यवर्धकतत्त्वं अलंकारः इति कथ्यते । आचार्य वामनस्य मते

**अलङ्कृतिः अलंकारः करण व्युत्पत्या पुनः।**
**अलङ्कार शब्दोऽयमुपमादिषु वर्तते ॥** [1]

राजशेखरेण अलङ्काराणाम् महत्त्वं दत्वा वेदानां सप्तमो भागः इति उक्तम् । तस्य मते अलङ्काराः अर्थस्य हितकारिणः भवन्ति- **उपकारकत्वात् अलंकारः सप्तममङ्गमिति यायावरीयः ऋते च तत्स्वरूप परिज्ञानात् वेदार्थानवगतिः** ।[2]

आचार्यदण्डी काव्यशोभकारकः धर्मं अलंकारः इति उक्तम्– **काव्यशोभाकरान् धर्मानलंकारान्प्रचक्षते।**[3] आनन्दवर्धनस्य दृष्ट्या धर्मः शब्दार्थकाव्यसाहित्यस्य अलङ्कारः एव । **अङ्गाश्रितास्त्वलंकाराः मन्तव्या कटकादिवत्।**[4] आचार्य मम्मटेन उक्तं यत् अलंकारः शब्दार्थस्य शोभावर्धनं कुर्वन् मुख्यतया रसस्य उपकारकः भवति ।

**उपकुर्वन्ति तं संतं ये अङ्गद्वारेण जातुचित्।**
**हारादिवदलंकारास्तेऽनुप्रासोपमादयः॥**[5]

कविराज विश्वनाथस्य मते अलंकारः शब्दानां अस्थिरः अथवा अनित्यः धर्मः अस्ति, यः काव्यसौन्दर्यस्य वर्धकः अस्ति – शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः। रसादीनुपकुर्वन्तोऽ-लङ्कारास्तेऽङ्गदादिवत ।

पण्डितराजजगन्नाथस्य दृष्ट्या काव्यस्य आत्मभूतव्यंग्यस्य सौन्दर्यवर्धक तत्वं अलंकारः- काव्यात्मनो व्यङ्ग्यस्य रमणीयता प्रयोजका अलंकाराः । (रसगंगाधर) उपर्युक्तपरिभाषाविश्लेषणात् अलङ्कारसम्बद्धं निम्नलिखिततथ्यानि इमानि ज्ञायन्ते -

1. काव्यस्य आन्तरिकः अनिवार्यः वा धर्मः नास्ति, केवलं बाह्यशोभावर्धकः एव इति ।

2. एषः अस्थिरधर्मः भवति। अभावेऽपि काव्यत्वस्य हानिः न भवति।

**क्वचित्तु स्फुटालंकार विरहेऽपि न काव्यत्वहानिः।**[6]

3. काव्यस्य शोभा सौन्दर्यं वा अलङ्कारमाश्रित्यं न भवति। सत्काव्ये अलङ्कारशक्तेः स्वतन्त्रता नास्ति ।

**रत्नपालचरितेअलङ्काराणां प्रयोगः**

**1. अर्थान्तरन्यासः**

'अर्थान्तरन्यास' इत्यत्र द्वौ शब्दौ स्तः - अर्थान्तरं न्यासश्च अर्थात् अन्यार्थस्य (अर्थान्तरस्य) न्यासः अथवा स्थापनं अर्थान्तरन्यासः अलंकारः इति। अस्मिन् सामान्यः विशेषेण सह, विशेषः सामान्येन सह वा समर्थनं क्रियते। कस्यापि कथनस्य समर्थनाय अर्थान्तरस्य स्थापनं भवति। अस्य मूले सादृश्यं भवति, यः शाब्दः भवति न तु आर्थः व्यङ्ग्यं वा। अस्य पुरस्कर्ता आचार्यभामहः इति मन्यते। तस्य मते पूर्वार्थसम्बन्धिना कथितार्थस्य वर्णने अर्थान्तरन्यासालङ्कारः भवति। 'हि' इति शब्दस्य प्रयोगेन अधिकं स्पष्टं भवति। आचार्य मम्मटस्य मते साधर्म्येन वैधर्म्येन च सामान्यस्य विशेषेण सह एवं विशेषस्य सामान्येन सह समर्थनार्थम् अयं अलङ्कारः प्रयुज्यते-

**सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।**

**यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥**[7]

यत्र विशेषेण सामान्यस्य सामान्येन विशेषस्य वा कारणेन कार्यस्य कार्येण कारणस्य वा साधर्म्येण वैधर्म्येण वा समर्थनं भवति, तत्र अर्थान्तरन्यासालङ्कार उच्यते। तदुक्तं साहित्यदर्पणे-

**सामान्यं वा विशेषेण विशेषस्तेन वा यदि।**

**कार्यं च कारणेनेदं कार्येण च समर्थ्यते॥**

महाप्रज्ञस्य काव्यसाहित्ये अस्य अलङ्कारस्य अधिकतया प्रयोगः कृतः अस्ति। 'रत्नपालचरितम्' इत्यत्र अनेकेषु स्थानेषु अस्य सुन्दरं विनियोजितम् अस्ति। उदाहरणानि द्रष्टव्यानि सन्ति-

**अथांशुमाली लसदंशुमाला,समाकुलः पूर्वशिलोच्चयस्य।**

**चूलां ललम्बे तमसः शमाय, सन्तो निसर्गदुपकारिणो यत्॥**[8]

सूर्यः पूर्वस्यां दिशि तस्य दुर्लभकिरणेषु समाकुलो भूत्वा तमः नाशयितुं उदितः। साधवः स्वभावतः हितकराः इति सत्यम्। सन्तो निसर्गदुपकारिणो एतत् सामान्यम्, एतेन सूर्यस्य तमविनाशकः स्वभावः समर्थितः अस्ति। 'यत्' इति शब्दः अर्थान्तरन्यासस्य बोधकः अस्ति। 'सन्तो निसर्गादुपकारिणो यत्' इति प्रशंसनीयं सुभाषितं वर्तते।

**एवं विकल्पप्रवणोऽवनीशोऽ-, नल्पप्रमोदेन पुरश्चचाल ।**

**संतः पुरोगा हि भवन्ति नित्यं, निसर्गतः सर्वविधौकृताज्ञाः॥**[9]

एवं चिन्तयित्वा निपुणः नृपतिः अतीव प्रसन्नः भूत्वा अग्रे अगच्छत्। यतः, ये सज्जनाः सर्वविधेषु स्वाभाविकतया आज्ञापालकाः सन्ति, ते सर्वदा अग्रगामी भवन्ति। अत्र 'संतः पुरोगा हि भवन्ति नित्यं' इति सामान्यवाक्येन - 'प्रवणोऽवनीशोऽनल्पप्रमोदेन पुरश्चचाल' – विशेषवचनस्य समर्थनं कृतम्। 'हि' इति शब्दस्य प्रयोगेन अर्थान्तरन्यासस्य सफलतया विन्यस्तः अस्ति।

**प्रकामवासेन नयेत भक्ति-ह्रासं गृहीत्वेति ततः सुशिक्षाम्।**

**जाते वपुर्लग्नजले कदुष्णे, बहिर्ययौ भानुरिवाऽम्बुदात् सः॥**[10]

एकस्मिन्नेव स्थाने अतिशयेन स्थित्वा भक्तिहानिः भवति। यदा शरीरे जलबिन्दवः उष्णाः अभवन् तदा राजा एतत् शिक्षां गृहीत्वा सरोवरात् बहिः आगतः, यथा मेघात् सूर्यः निर्गच्छति। अत्र 'प्रकामवासेन' इति सामान्यशब्दस्य 'जाते-सः' इति विशेषशब्देन समर्थितः। 'अम्बुदात्बहिर्ययौ' इति तथ्यस्य अभिव्यक्त्यर्थं अन्यस्य अर्थस्य (प्रकामवासेन भक्तिह्रासं) उपस्थापनं कृतं वर्तते। उपमाविनियोगेन तस्य 'सुवर्णे गन्धवत्' सौन्दर्यं वर्धितमस्ति। अर्थान्तरन्यासोपमाभेदयोः एकत्रैव सन्निधानेन संसृष्टि-अलङ्कारस्य सौन्दर्यम् अपि चर्व्यमस्ति।

**कि युक्तमालोचि मयाऽथवा न, सुहृद् गृहं किं परकीयमस्तु ।**

**आः प्रस्मृतं स्वार्थी जगत् व्यवस्था, प्यर्धांगनान्या हि विपत्तिकाले॥**[11]

मया यत् चिन्तितम् तत् सम्यक् अस्ति वा न? मित्रस्य गृहं किमर्थं परकीयं गणनीयम्? अहो! अस्य स्वार्थस्य जगतः व्यवस्थायाः विषये अहं त्रुटिं करोमि, यतः विपत्तिकाले मम भार्या अपि परकीया भवति। 'अर्धांगनान्या अपि विपत्तिकाले' इति विशेषवचनं 'प्रस्मृतं स्वार्थी जगत् व्यवस्था' इति सामान्यवाक्येन समर्थितम्। 'हि' इति अर्थान्तरन्यासस्य वाचकशब्दः। लौकिकव्यवहारजगतः 'अर्धांगनान्या....' इति सूक्तिः स्वीकृता अस्ति।

**विद्याबलादात्मबलातिरेकाद्, विजित्य तं राज्यमथो ददेऽस्मै।**

**नैवोत्तमा लोभलवं स्पृशन्ति, यतो न लोभात् परमस्ति पापम्॥**[12]

राजा रत्नपालः अपारविद्यया आत्मशक्त्या च तत् राज्यं विजित्य तस्याः युवत्याः पित्रे दत्तवान्। सज्जनाः लोभस्य स्पृशनमपि न कुर्वन्ति, यतः लोभात् बृहत्तरं पापं जगति नास्ति। अत्र विशेषं सामान्येन समर्थितम्।

**विनिर्ययौ तस्य शुगाशु पापैः, समं मुनेर्दर्शनतः प्रनष्टैः।**

**सहर्षमुत्थाय पदौ ववन्दे, सद्दर्शनं यन्नयनं पुनाति ॥**[13]

तस्य चिन्ता मुनिदर्शनकृतपापैः सह प्रलीयते। प्रसन्नो भूत्वा मुनेः पादौ वन्दनं कृतवान्। सज्जनानां दर्शनेन नेत्रे शुद्धे भवतः इति सत्यम्। अत्र सद्दर्शनं यन्नयनं पुनाति सामान्येन मुनेर्दर्शनतः प्रनष्टैः पापैः समं तस्य शुचाशु विनिर्ययौ, इति विशेषं समर्थितम्।

**चकित विस्मित चित्त इलापति, स्तत इयाय यथाऽव्यवसायिना।**

**विरत चेतसः एषः शुभः क्रमो, न पवनो नियतं व्रजति क्वचित्॥**[14]

रात्रिवचः श्रुत्वा चकितः राजा रत्नपालः अनिश्चितमार्गेण अगच्छत्। इति विरक्तानाम् एषः एव शुभः क्रमः। वायुः कदापि नियतवेगेन न गच्छति। अत्र 'न पवनो नियतं व्रजति' इति सामान्येन इयाय यथाऽव्यवसायिना, विशेषः समर्थितः अस्ति। अतः अत्र अर्थान्तरन्यासालङ्कारस्य सफलप्रयोगः दृश्यते ।

**2. उपमा अलङ्कारः**

आचार्यश्री महाप्रज्ञः अपि उपमायाः प्रयोगे प्रवीणः अस्ति। तस्य उपमाः सरलाः स्वाभाविकाश्च सन्ति। जनशास्त्रप्रकृतिसंसार-सम्बद्धानां उपमानां सुन्दरं विनियोगः अभवत्। अमूर्त-मूर्तयोः, मूर्तामूर्तोपमेयोपमानां प्रयोगः उत्तमः कृतोऽस्ति । केचन उदाहरणानि अधः चर्चा कृता - (वधिकाः चिन्तितवन्तः) किं अस्माभिरेव स्वामिनः वधः कर्तव्यः? किं वयं एवं कृत्वा कृतघ्नाः न भविष्यामः? अनया चिन्तया दुःखितः स राजानं त्यक्तवान्। मुक्तमात्रेण दूरं जगाम यथा कर्ममुक्तात्मा लोकान्तरं गच्छति (२.१८। अत्र अमूर्तोपमेयबन्धनात् मुक्तस्य राज्ञः कृते अमूर्तोपमानात्मनः प्रयोगः कृतः। यथा कर्मयुक्तात्मा लोकान्तरं अर्थात् सुरक्षितं स्थानं गच्छति, तदा कर्मभयं तं न बाधते, तथैव राजा वधकर्तृभ्यः मुक्तः भूत्वा सुरक्षितं स्थानं प्राप्तवान् । एतत् तथ्यं प्रकाशितम् वर्तते । लौकिकजगतः संगृहीतस्य उपमायाः सौन्दर्यं उत्तममस्ति-

**विचारगर्भा धिषणालसाऽभूद्,मेधाविनो गर्भवती मृगीव।**
**तेनैव संकल्प विहारणीयं,न निश्चयाऽध्वानमुपैतुमर्हा॥**[15]

मेधाविनः राज्ञः विचारगर्भा बुद्धिः गर्भवती मृगी इव मन्दः अभवत्। अत्र अमूर्त उपमेयस्य कृते मूर्त उपमानस्य प्रयोगः कृतः अस्ति। गर्भवती मृगी गमनं, परिभ्रमणं कर्तुं असमर्थाः भवति, तथैव बुद्धिः विचारेषु चिन्तासु वा मग्नः भूत्वा स्वकार्यं कर्तुं असमर्थः भवति। अक्षमतारूपी साधारणधर्मस्य प्रतिपादनं कृतं वर्तते।

**यत्रापि कुत्रापि यथा कथञ्चित्, कालात्ययो हा क्रियते हठेन ।**
**यथा विदग्धेन वचो व्ययो हि, मितंपचेन द्रविणत्ययो वा ॥**[16]

यथा विद्वान् वचनं व्यययति, कृपणः धनं व्यययति, तथैव स राजा हठपूर्वकं यथा कथञ्चित् समयं व्यतीतुं आरब्धवान्। 'दुःखकालः शीघ्रं न गच्छति' इति तथ्यं प्रकाशयितुं विद्वान्-वचनं, कृपण-धनं च उपमानमिति गृहीतम्। अत्र एकस्योपमायाः कृते सार्थकस्य एवं औचित्यपूर्णोपमानस्य उपमाद्वयं स्थापितं। एवं प्रकारेण काव्यसौन्दर्यार्थं, तथ्यस्य सूक्ष्मव्यञ्जनाय च अनेकस्थानेषु उपमायाः प्रयोगः कृतः अस्ति।

**3. रूपकम्**

महाकवि महाप्रज्ञेन 'रत्नपालचरित' इत्यस्मिन् उदात्तं भव्यं च निरूपणावसरे रूपकस्य साधुविनियोगः कृतः अस्ति। दिव्य-सुन्दरीद्वारा कृतायां स्तुतौ राज्ञः माहात्म्यं प्रकाशयितुं - 'जय-जय दस्युतमोऽभ्रमणे' इत्यत्र 'दस्यु-तम' इति पदे रूपकस्य विनियोगः कृतः अस्ति । दस्यु इत्यत्रैव तमसः अभेदारोपणात् रूपकालङ्कारः अस्ति।

**'जय-जय सुकृतम्भोजसरो जय-जय वाञ्छित कल्पतरो ।**
**जय-जय कविभिर्गीतनुते, जय-जय सकलधराधिपते ॥**[17]

अत्र राज्ञः कीर्तिं प्रकाशयितुं सुकृत-कमल-सरोवरमिति उक्तम्। सुकृते एव कमलस्य आरोपः कृतः वर्तते।

**आरुढवानुत्तरदग्गेन्द्रं संप्रत्यहो उत्तरनागराजम्।**
**तथाधिरूढा नृवरांगमाज्ञा, नारोक्ष्यते किं मम राजमौलिम् ॥**[18]

इति श्लोकांशे 'दिग्गजेन्द्रं' इत्यत्र रूपकालङ्कारः अस्ति। दिशि एव गजेन्द्रस्य आरोपः अस्ति। इदं रूपकं राज्ञः उत्तमशौर्यस्य वाचकार्थं युक्तम् अस्ति।

**यस्मिन्नधीनीकृतमत्तचेतो, मतंगजा योगिवरा वसन्ति।**
**तत्र स्थितानामवनीकहाणां,चित्रप्रदो नागजयो न तेऽयम्॥**[19]

अत्र चित्तरूपी मत्तः मतङ्गजं (गजं) नियन्त्र्य योगीवराः यत्र वसन्ति इत्यर्थः। अत्र चित्ते मतंगजस्यारोपः कृतं वर्तते। सहाङ्कुरां तद् हृदयोर्वरां स. (तत्रैव २.५) - राज्ञः भाषणेन (प्रश्नैः) प्रश्नवृष्ट्या कन्याहृदयरूपीभूमिं अङ्कुरिता कृता। अत्र हृदयेभूमौ प्रश्नवृष्टेः आरोपः कृतोऽस्ति।

**भूपाल! भूमी किल रत्नगर्भा,रत्नान्यनेकानि यतः प्रसूते।**
**तन्मध्यगस्यैयकमणेः प्रकाशो, प्रकाशयत् त्वां मम भाग्यचान्द्रम्॥** [20]

अत्र रत्नगर्भायाः पृथिव्याः एकमणेः प्रकाशेन मम भाग्यरूपी चन्द्रकान्तमणिरूपे त्वं प्रकाशिता। अत्र भाग्ये चन्द्रकान्तमणिः अर्थात् अमूर्ते मूर्तत्वस्यारोपः कृतः वर्तते।

**तस्मिन् समं सौधसुधाकरेण, तद्भूपतेजस्तपनोऽभ्युदेति।**
**तारानिभैरन्य गृहैर्वृतेन, मिथो नृणां वैरमतो न शंके॥** [21]

तस्मिन् (शक्रपुरे) नगरे तारा इव अन्यैः गृहैः आवृतेन राजभवनरूपेण चन्द्रेण सह तस्य राज्ञः तेजरूपीसूर्यः अपि उदेति। अतः तत्र जनानां मध्ये वैरभावः नास्ति इति निश्चितम्। अत्र राजप्रासादे चन्द्रे राज्ञि च सूर्यस्यारोपणं कृतम्। राज्ञः माहात्म्यं भव्यं च उद्घाटितं वर्तते। नागरिकानां परस्परं निर्वैरता रूपकद्वारा सुन्दररूपेण प्रतिपादिता अस्ति।

**दैनिक खेदेनाहुतेव, नयनस्नेहप्रियमुन्मील्य ।**
**जागरिता द्रविणं हर्तुं तां, निद्रादस्युरिवाऽधिचकार॥**[22]

नित्यशोकेन आमन्त्रिता इव नेत्ररूपदीपान् उन्मील्य, जागरितरूपीधनमपहर्तुं निद्रारूपः दस्युः तां राजकुमारीं अधिगृहीतवान्। अत्र राजकुमार्याः निद्रा रूपकद्वारा सुन्दरं वर्णिता अस्ति। नेत्रेषु दीपस्य, जागरणे धनस्य, निद्रायां दस्यु इत्यस्य च आरोपः अस्ति।

**4. उत्प्रेक्षा**

'रत्नपालचरिते' अनेकस्थलेषु वर्णनात्मकस्य उत्तमं प्रतिपादनाय अस्य अलङ्कारस्य उपयोगः कृतः अस्ति। केषाञ्चन उदाहरणानां व्याख्या अधः क्रियते -

**राज्ञी तदीयाऽजनि चन्द्राकान्ता, यत्सौकुमार्येण विडम्बितानि।**
**पद्मान्यऽगुर्वारिणि धावितुं स्व, मकीर्तिमालिन्यमति प्रतीतिः॥**[23]

राज्ञः रत्नपालस्य राज्याः नाम चन्द्रकान्ता आसीत्। तया स्वीय सौकुमार्येण सर्वाणि पद्मानि विडम्बनानि कृतानि आसीत्। तेन विडम्बना पीडितः पङ्कजाः स्वस्य अकीर्तिरूपीमलिनतां प्रक्षालयितुं जले गताः इव। अत्र 'अकीर्तिमालिन्यमिति प्रतीतिः' इत्यत्र उत्प्रेक्षालङ्कारः अस्ति। व्यातिरेकस्य योजनेन अस्य सौन्दर्यं वर्धितम् अस्ति ।

**त्वं रत्नपालोऽसि वसुंधराहं, स्यां पालनीयांगजपालकत्वात् ।**

**मन्ये धरित्रीत्यनुरुद्धय चक्रे, तं रत्नपालं महिपालमत्र ॥** [24]

भूमिस्तं रत्नपालं राजानं प्रतिष्ठितवती इति अहं मन्ये। 'मन्ये' इति उत्प्रेक्षासूचकशब्दः।

**5. व्यतिरेकः**

व्यतिरेकः अर्थात् - विशेषप्रकारस्य अतिरेकः आधिक्यं वा - 'व्यतिरेको विशेषेणातिरेकः आधिक्यम्। यदा कविः उपमानस्य अपेक्षया उपमेयस्य आधिक्यता प्रतिपादयितुमथवा न्युनता प्रदर्शयितुमिच्छति तदा तत्र व्यतिरेकालंकारस्य प्रयोगं करोति। उपमानापेक्षया यत्र उपमेयस्य आधिक्यमथवा न्यूनता वर्ण्य व्यतिरेकालङ्कार उच्यते। उक्तं च साहित्यदर्पणे **"आधिक्यमुपमेयस्योपमानान्यूनताऽथवा व्यतिरेकः" इति ।**

भामहः उपमानस्य अपेक्षया उपमेयस्य गुणोत्कर्षवर्णनं व्यतिरेकः इति उक्तवान् ।

**उपमानवतोऽर्थस्य यद्विशेषनिदर्शनम् ।**

**व्यतिरेके तमिच्छन्ति विशेषापादनाद्यथा॥**[25]

मम्मटेन उपमेयस्य गुणात्मकं वर्णनं व्यतिरेकः इति उक्तम्-

**उपमानाद्यन्यस्य व्यतिरेकः स एव सः।**

**अन्यस्योपमेयस्य व्यतिरेक आधिक्यम्॥** [26]

उपर्युक्तपरिभाषाविश्लेषणात् निम्नलिखिततथ्यानि उद्भवन्ति -

1. अस्मिन् उपमेयस्य उत्कृष्टतायाः प्रतिपादनं उपमानस्य च अवनतिः सिद्धः भवति।
2. उपमेयस्योन्नतिः उपमानस्य च अवनतिसिद्ध्यर्थं कल्पनायाः हेतोः वा निर्देशः क्रियते।
3. सादृश्यः शाब्दः न भूत्वा आर्थः व्यङ्ग्यः वा भवति।
4. वैधर्म्यस्य कल्पनाद्वारा उपमेयोपमानयोः भेदः क्रियते।

अयं अलङ्कारः रत्नपालचरिते बहुषु स्थानेषु प्रयुक्तः अस्ति -

**अहर्निशं पाति भयान्मनुष्यानऽयं, दिनेष्वेव ममान्शुराशिः ।**

**इतीवा तस्याऽवनिपालमौलैः सूर्यः सपर्येच्छुरिवोन्मुखोऽभूत् ॥ 27**

मम किरणजालं दिने एव मनुष्यान् भयात् तारयति परन्तु अयं राजा अहर्निशं भयात् मनुष्यान् रक्षति इति मत्वा सूर्यः पूजकर्तुं तस्य समीपं गतः। राज्ञः विषये अतिशयेन अत्र वर्णितमस्ति। सूर्यः दिने एव जगतः रक्षति, राजा तु अहोरात्रौ रक्षति, अतः सः सूर्यात् महत्तरः अस्ति। अत्र सूर्यापेक्षया राज्ञः महत्त्वम् आधिक्यं दृश्यते इति कारणतः अत्र व्यतिरेकालंकारः व्यञ्जते।

सरोवरस्य उत्कृष्टता श्रेष्ठता वा निम्नलिखितश्लोके व्यक्ता अस्ति –

**पानार्थमन्ये वितरन्ति वित्त, महं तदा जीवनमर्पयामि ।**

**तेनैव मह्यं महिजानिरत्र, विशालकायं सदनं ददाति।।**[28]

राज्ञः (भूधवस्य) वृक्षात् (भूरोः) श्रेष्ठत्वस्य प्रतिपादनं -

**अनल्पकालं सलिलाऽभिषिक्तः, फलप्रदः स्यादिह भूरुहोऽपि ।**

**सख्या सकृन्मे मनसा स्मृतोपि, फलप्रदस्त्वं किल भूधवोऽपि॥**[29]

(सखी वदति) वृक्षाः चिरकालं सिञ्चिते फलं ददति; भूधवः (राजा) भूत्वा अपिमम मित्रस्य एकवारं त्वां स्मरणेन त्वं फलप्रदः असि । अत्र राज्ञः सर्वोत्तमः व्यङ्ग्यः कृतः अस्ति । वृक्षापेक्षया राज्ञः उत्कर्षः आधिक्यं दृश्यते इति कारणतः अत्र व्यतिरेकालंकारः ।

वसंतपुरं नगरं स्वर्गात् अपि श्रेष्ठम् आसीत्, तत् निम्नलिखितश्लोके सुन्दररूपेण प्रतिपादितम् अस्ति ।

**अस्ति स्म तस्मिन्नचले वसन्ता, भिधं पुरं सर्व पुरप्रधानम् ।**

**धरापुरन्ध्रयास्तिलकायमानं, कान्त्या हतस्वर्गपुराभिमानम् ॥**[30]

समन्वयः – स्वर्गादपेक्षया वसन्तपुरनगरस्य उत्कर्षः आधिक्येन कृतः वर्तते। अतः अत्र व्यतिरेकालंकारः।

शक्रपुरस्य जलाशयस्य जलं गङ्गाजलात् स्वच्छतरं शुद्धतरं च धारयति-

**जलाशयास्तत्र निजावदात- वाराऽमलत्वं हरशेखरायाः ।**

**विजित्य मोदाज्जयवैजयन्ती, स्तोमं दधुर्वारिजकैतवेन ॥**[31]

समन्वयः – अत्र द्वयोः जलाशयोर्मध्ये तुलना दृश्यते। शक्रपुरस्य जलाशयस्य गङ्गाजलात् शुद्धता तथा गङ्गाजलस्य शक्रपुरजलाशयात् अपकर्षता प्रतिपादनकारणात् अत्र व्यतिरेकालंकारः।

**6. काव्यलिंग**

अस्मिन् शब्दे काव्यं लिंगं च शब्दद्वयं अस्ति । अस्य अर्थः भवति- काव्यस्य हेतुः अर्थात् तादृशं कारणं यत् काव्ये वर्णयितुं शक्यते । कविः यत् तथ्यं प्रमाणितुम् इच्छति तस्य कारणं वाक्यार्थे पदार्थे वा ददाति इति अर्थः । एषः तर्कः न्यायमूलकः अलङ्कारः अस्ति । मम्मटस्य मते वाक्यार्थरूपेण पदार्थरूपेण वा यदा कारणं कथ्यते काव्यलिंगालंकारः भवति - **काव्यलिंगं हेतोर्वाक्यपदार्थता ।**

रुय्यक इत्यनेन वाक्यार्थरूपेण पदार्थरूपेण वा हेतु-कथनं काव्यलिंगम् इति उक्तम्-

**'हेतोर्वाक्यपदार्थत्वे काव्यलिंगम्'**

अयं अलङ्कारः एतदर्थं भिन्नः यतः काव्यलिंगे कार्य-कारणभावस्य प्राधान्यं भवति एवं अर्थान्तरन्यासालङ्कारे सामान्यविशेषभावस्य प्राधान्यं भवति । अर्थान्तरन्यासे एकं वाक्यं उपस्थाप्यते अपरं न उपस्थाप्यते, किन्तु काव्यलिङ्गे उभावपि प्रस्तुतौ भवतः। 'रत्नपालचरितं' इति काव्यस्य कविः काव्यलिंगस्य प्रयोगे निपुणः अस्ति। अस्य सुन्दरं विन्यासं बहुषु स्थानेषु कृतम् अस्ति-

**यत्र क्वचित् याम्यकृतारिभाव, स्तत्रापि मोदं लभते न घूकः।**

**तद् दूषणं तस्य ममाथवेति, स बौद्धुमस्मिन् विदुषां विचारम् ॥**[32]

कविः वदति - सूर्यः चिन्तितवान् यत् अहं मैत्रीभावेन सर्वत्र गच्छामि, परन्तु उलूकः मयि न प्रसन्नः भवति, 'किं तस्य दोषः मम वा' इति, सः अस्मिन् विषये विदुषां मतं ज्ञातुं आकाशे भ्रमति।

'सूर्यः आकाशे चरति' उलूकः अस्य कर्मणा अप्रसन्नः अस्ति अत्र 'कस्य दोषः' इति ज्ञातुम् इच्छा कारणं वर्तते। अत एव काव्यलिंगालङ्कारः अस्ति।

**सूर्ये गते तद्रिपुरन्धकारः, संकोचमब्जं नयते नितान्तम् ।**

**अक्षम्यमाडागः परिभाव्य तस्य, समूलमुन्मूलयतुं पदानि ॥**[33]

तमसः अक्षम्यम् अपराधं ज्ञात्वा सूर्यः तस्य नाशाय (अन्धकारस्य) चरति। 'सूर्यः चरति, अस्य कार्यस्य कारणं अन्धकारस्य समूलनाशः अस्ति। अत्र कार्य-कारणभावः अस्ति।

**पानार्थमन्ये वितरन्ति वित्त, महं तदा जीवनमर्पयामि ।**

**तेनैव मह्यं महिजानिरत्र, विशालकायं सदनं ददाति ।।**[34]

अन्ये रक्षणार्थं धनं वितरन्ति, अहं च जलं पातुं ददामि, अतः राजा मह्यं अत्र विशालं स्थानं ददाति। अत्र 'अहं तदा जीवनमर्पयामि' इति कारणं तथा 'विशालं कार्यं सदनं ददाति' कार्यम्। उपर्युक्तश्लोके श्लेष-व्यतिरेक-काव्यलिंग-अलंकारः तथा त्रयाणां तिलतण्डुलन्यायात् उपस्थितहेतौ संसृष्टेः सौन्दर्यं मनोहरं जातम्।

**7. अर्थापत्तिः**

अस्यार्थः भवति- अर्थस्य आपत्तिः करणम्। अस्मिन् अलङ्कारे एकस्य कार्यस्य सिद्ध्या वर्णनेन वा सह अन्यस्य अशक्यस्य कार्यस्य सिद्धिः वर्णनं वा क्रियते। एषः वाक्यन्यायमूलकालङ्कारः अस्ति। अस्मिन् 'दण्डापूपिकान्याय' 'कौमुतिकन्याय' इति आधारेण अन्यकार्यस्य सिद्धिः उल्लिखिता अस्ति । रुय्यकः वदति- 'दण्डापूपिकान्यायेन' अन्यार्थस्य प्रतीतिः अर्थापत्तिः अलंकारः भवति- **दण्डापूपिकयार्थान्तरापतनमर्थापत्तिः।** अप्पयदीक्षितस्य मते कैमुत्यन्यायेन अर्थ-सिद्धिः अर्थापत्तिः उच्यते -

**कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते ।**

**तांत्रिकाभिमतार्थापत्ति व्यावर्तनाय काव्येति विशेषणम् ॥**[35]

'रत्नपालचरितं' इत्यस्य महाकविः अस्य अलङ्कारस्य प्रयोगे कुशलः अस्ति । अनेकस्थानेषु अयं अलङ्कारः उदात्त-उच्च-भावना-व्यञ्जनाय प्रयुक्तः अस्ति -

**आरूढा वानुतरदिग्गजेन्द्रं, सम्प्रत्यहो उत्तरनागराजम् ।**

**तथाधिरुढा नृवराङ्गमाज्ञा, नारोक्ष्यते किं मम राजमौलिम् ॥**[36]

किं मम आदेशः यः मनुष्याणां शिरसि आरुह्यते सः नृपशिरसि न आरुह्यते अर्थात् अवश्यमेव भविष्यति । अत्र कौमुतिकन्यायेन "मम आदेशः सर्वान् वशीकरणे समर्थः अस्ति" इति तथ्यस्य प्रतिपादनं कृतम् ।

**लुण्टाकवृत्त्या परकीयवस्तु, त्राते विधत्तेऽनधिकारचेष्टाम् ।**

**असह्यमेवेति मया प्रकृत्या, सिन्धुर्न कि प्लावयति स्म काकम् ॥**[37]

यः व्यक्तिः अन्यस्य वस्तुं लुण्ठनप्रवृत्त्या तस्य स्वामित्वं गृह्णाति, सः अनाधिकारप्रयासः एव । स्वाभाविकतया एतत् मम कृते असह्यम् अस्ति । समुद्रः काकं न प्रवाहयति वा ?

अत्र राज्ञः प्रबलशक्तिः कौमुतिकन्यायद्वारा निरूपिता अस्ति । 'किं समुद्रः काकं न प्रवाहयति ?' तस्य अर्थः अवश्यं पातयति इति । अनेन स्पष्टं भवति यत् राजा लुण्ठकानां दमनं कर्तुं समर्थः अस्ति ।

**न दुर्जनैः कार्यमजर्यमीयु, स्तदीक्षणाद् बोधमिमं पुरस्थाः।**

**एतद् भावेन मुक्तसराब्धिमैत्र्यं, केषां प्रियं नो सलीलं सलीलम्॥**[38]

तेषां जलाशयानाम् जलं दृष्ट्वा सः नागरिकः उक्तवान् यत् दुष्टैः सह मैत्री न कर्तव्या इति। इयं जलराशिः क्षारसिन्धोः सङ्गतिं त्यक्त्वा कस्य कृते प्रियं न भवति। अत्र कौमुतिकन्यायात् दुर्सङ्गतेः परित्यागाय उक्तमस्ति।

**8. दृष्टान्तः**

'दृष्टान्त' इत्यस्यार्थः- उदाहरणम्। अस्मिन् कमपि तथ्यं स्थापयितुं अन्यत् तत्सदृशं तथ्यं (उदाहरणम्) दीयते। तस्मिन् द्वे वाक्ये भवतः- एकं उपमेयवाक्यं अपरं उपमानवाक्यं च तयोः उभयत्र साधारणधर्मे यदि बिम्बप्रतिबिम्बभावं भवति तर्हि दृष्टान्तालङ्कारः भवति। अयं साधर्म्यं वैधर्म्यं च प्रकारद्वयं भवति - दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम्।

चन्द्रालोक-कुवलयानन्द-साहित्यदर्पणेषु काव्यप्रकाशस्य अनुसरणं कृतमस्ति। (चन्द्रलोके ५.५६, कुवलयानन्दे ५२, साहित्यदर्पणे १०.५१) 'रत्नपालचरितम्' इत्यत्र दृष्टान्तः बहुषु स्थानेषु सुन्दररूपेण व्यवस्थितः अस्ति । केचन उदाहरणानि सन्ति-

**परसदननिविष्टः को लघुत्वं न याति ।**

**भवति विकलकान्तिः कौमुदीशो दिनेऽसौ॥**[39]

परस्य गृहे प्रविश्य कः लघुतां न लभते इत्यर्थः। चन्द्रः दिवसे सूर्यस्य गृहं प्रविश्य कान्तिविहीनः भवति। अत्र प्रविशन् परगृहं व्यक्तिः चन्द्रं च, परगृहे दिवसे च प्रतिबिम्बितः भवति। पराश्रयः निषिद्धः - एतत् तथ्यं विस्तृतदृष्टान्तद्वारा प्रस्तुतम् अस्ति। 'विरक्ताः जनाः अनिश्चिते (शाश्वते) मार्गे गच्छन्ति।' एतत् प्रमाणयितुं प्राकृतिकजगतः उदाहरणानि सङ्गृहीतानि सन्ति -

**चकित विस्मित चित्त इलापति, स्तत इयाय यथाऽव्यवसायिना।**

**विरत चेतसः एषः शुभः क्रमो, न पवनो नियतं व्रजति क्वचित्॥**[40]

रात्रिवचनं श्रुत्वा राजा विस्मितः अभवत्। सः अनिश्चितमार्गेण अगच्छत् । एतत् विरक्तजनानाम् शुभक्रमः भवति । नियतक्रमेण वायुः कुत्रापि न गच्छति। अत्र राज्ञः वायोः मध्ये बिम्बप्रतिबिम्बभावः अस्ति ।

उपर्युक्तानां अलङ्कारानाम् अतिरिक्तं उदात्त-परिकर-विनोक्ति-पर्याय-श्लेष-विशेषोक्ति-व्याजोक्ति-कारणमालादीनामलंकाराणामपि प्रयोगः कृतः अस्ति।

**संदर्भ ग्रंथ सूची –**


1. **अलंकार सर्वस्वम्।** रुय्यकः। निर्णयसागरः, मुंबई सं. 1893
2. **काव्यादर्शः।** दण्डी। व्याख्या आचार्यश्रीरामचन्दमिश्रः। चौखम्बा विद्याभवनम्, वाराणसी। पुनर्मुद्रितं संस्ककरणम् – 2005
3. **काव्यालङ्कारः।** भामहः। व्याख्या. श्रीरामदेव शुक्लः। चौखम्बा विद्याभवनम् वाराणसी, संस्करणम् – 2014
4. **काव्यमीमांसा।** राजशेखरः। व्याख्याः यमुनारामत्रिपाठी। शारदा संस्कृत संस्थानम्।
5. **काव्यप्रकाशः।** मम्मटः। व्याख्या रामसागर त्रिपाठी। मोतीलाल बनारसीदास वाराणसी, प्रथमसंस्करणम् 1982 – भाग 1। 1983 भाग – 2
6. **कुवलयानन्द।** अप्पयदीक्षितः। सम्पा. जयशकरलाल त्रिपाठी, चौखम्बा संस्कृत सीरिज ऑफिस वाराणसी 2016
7. **रत्नपालचरितम्।** आचार्य महाप्रज्ञ। जैन विश्वभारती संस्थान लाडनूं (राज.)


**संदर्भः -**

1. काव्यालंकार सूत्रवृत्ति 1.12
2. काव्यमीमांसा
3. काव्यादर्शः
4. काव्यालंकारः
5. रत्नपालचरितम् 1.1
6. रत्नपालचरितम् 1.29
7. रत्नपालचरितम् 2.3
8. रत्नपालचरितम् 2.23
9. रत्नपालचरितम् 2.30
10. रत्नपालचरितम् 2.46
11. रत्नपालचरितम् 3.10
12. रत्नपालचरितम् 2.20
13. रत्नपालचरितम् 2.25
14. रत्नपालचरितम् 1.23
15. रत्नपालचरितम् 1.28
16. रत्नपालचरितम् 1.30
17. रत्नपालचरितम् 2.8
18. रत्नपालचरितम् 3.14
19. रत्नपालचरितम् 4.24
20. रत्नपालचरितम् 3.20
21. रत्नपालचरितम् 3.28
22. प्रदीप, पृष्ठ 502
23. काव्यालंङ्कारः 2.75
24. काव्यप्रकाशः 10.105
25. रत्नपालचरितम् 1.3
26. रत्नपालचरितम् 2.2
27. रत्नपालचरितम् 2.4
28. रत्नपालचरितम् 2.39
29. रत्नपालचरितम् 3.16
30. काव्यप्रकाश 10.114
31. अलङ्कार सर्वख पृष्ठ 189
32. रत्नपालचरितम् 1.9
33. रत्नपालचरितम् 2.3
34. अलङ्कार सर्वख पृष्ठ 196
35. कुवलयानन्द 120
36. रत्नपालचरितम् 1.28
37. रत्नपालचरितम् 2.29
38. रत्नपालचरितम् 3.18
39. काव्यप्रकाशः 10.102
40. रत्नपालयरितम 2.22